यावदिच्छं स्त्रियः व्रजेत् यथा चाऽपत्यवान् सद्यो
भवेत् तदुपदेक्ष्यते - अत्र चोदयति। स्त्रियो व्रजे-
दित्युक्ते पुंग्रहणं लभ्यत एव नार्थः। तत्रैतस्य स्त्रि-
यं व्रजति तस्यापि वाजीकरणप्रभावादपत्यभाक्त्वं
स्यात् यथा पुंसवनकर्मणा गर्भपरिवृत्तिरसायनेन
दीर्घायुष्ट्वाद्येवं स्त्रीर्गमनशक्तिः सद्यो भविष्यतीत्येवं
माभूदिति नाग्रहणमन्यायोऽक्षोन्नायमेक   ला एवाप-
त्यभाविनो जातबला अविनापत्यभागिनः अजातबला
अप्यपत्यभागिन इति प्रतिपादयन् सर्वान् बल-
विशेषानाह— नहि जातबलाः सर्वे नराः नापत्य-
भागिनः बलिन इत्यादि। यावत्केचित्प्रयत्नैर्बलि-
न्ते वृषाः केचित्स्वभावतः बृहच्छरीराः ये मेदस्विन-
स्ते, व्यल्पव्यवायाः अल्पाश्रया अपि नु सारा बलव-
न्तो बहुप्रजाः कालयो निदिति कालयोगेन बलं येषां
ते कालयोगबलाः। स च कालो द्विविधः यौवनम्-

द्वितीये (प्रथमः पादः)

लाख्यश्चैतदुक्तं भवति- यदा हेमन्तादिना कालेन समन्वागतबलो वसन्तेन   दनो भवति। यौवनं च सर्वेन्द्रियोत्सवभूतं प्रतिपद्यते। तदा बलबलमासाद्य प्रवर्त्तत इति। कथंच वयं काय इत्युच्यते। आचार्यकं हि कालप्रमाणापेक्षिणी शरीरावस्था वयः केचि-   इत्येतदुक्तं भवति- शीलनेनव्यवायस्य समर्थाः सम्पद्यन्ते। अङ्गनां गन्तुमिति मतिं केचित् प्रयत्नैर्वर्द्धयन्ते। औपनिषदिकोक्तैः वृषाः केचित् स्वभावतः प्रकृत्यैवेत्यर्थः। यत एवं तस्मात् प्रकानां बलप्रदानित्यादि। प्राक् शुद्धशरीराणां निरुहान् सानुवासनान्।

बलापेक्षी प्रयुञ्जीत शुक्रापत्यविवर्धनान्॥

एतदुक्तं भवति- शुद्धानामेधिताग्नीनां यथा बलं प्रयुक्तं वाजीकरणं य - न्यथानर्थायते। तयोः घृतादिभिः क्षीरमांसरसाशिनां विधेया इति। पिष्ट्वा वराहमांसानित्यादि। यावत् तं पिबन् भक्षयंस्तांश्च लभ-

ते शुक्रमक्षयं सन्तानप्रवृत्त्या अक्षयमित्युपचर्यते।
तप्ते सर्पिषि भर्जये · माणा गुळिका इत्ययमभिप्रा-
यः। सर्पिषा तप्तेन नवनीतावस्थामतिक्रान्तेन नव-
नीतावस्थायां हि सावशेषकालुशेयावयत्वादम्नानु-
गतं प्रयोगेनेष्यते। ननु सर्पिषीत्युक्ते तदेव गम्यते
- नीतांशकेत्युच्यते। अम्लचार्यकान। नवनीतं घृतस्ना-
तमित्यस्ति नवनीते घृतव्यपदेशः। तस्मात् तदपन-
यनार्थमिति व्याख्यानयन्ति। तेन च तप्तेन ताः संह-
तिमासादयन्ति। तथा न भिद्यन्ते द्रवे प्र डिमसा-
रिक इति सारिके सान्द्रीभूत इत्यर्थः। दधिदाडिमा-
म्लमिष्यते। नान्यत् भुक्तार्द्दितस्य शुक्रक्षयहेतुकत्वेना-
म्नानादम्लो,म्लं पच्यते। अम्लश्च पाकः शुक्रनाशन इ-
त्येष प्रथमा। मांसानां - ध्यानामित्ययमतिदेशो
गण्यतेति बहुत्वादपि मेध्यानामेक एवायं विवक्षि-
तो द्वितीयः। माषानङ्कुरितान्निस्तुपूषान् साजहाफला-
निसाद्यं तृतीयः। अजहा कपित्थक - आर्द्राणिमस्य

द्वितीये (प्रथमः पादः)

नुभजिताः कूनप्ते सर्पिर्षीति विरामो मत्स्यशब्दस्य सामान्यवाचित्वेऽपि रोहितग्रहणम् प्रधानकल्पना - श्रयणाद्रोहितो मत्स्यानामित्ययं चतुर्थः। घृतस्पृष्टं रसे च्छाग इत्यादि पञ्चमः। कुटकं मत्स्यमांसानामि - त्यादि गो · · हिषे च रसे मत्स्यान् स्निग्धाम्ल - लवणे पचेदित्यादि। यावन्माषपूपलिकानां तदगर्भार्थ - मुपकल्पयेत्। एतौ पूपलिकायोगौ पूर्वैः पञ्चभिः सह सप्तमाषात्मगुप्तेवेत्यादि। यावत् घृते पूपलिका - - - कः कौकिलाक्षकः। शर्करायास्तु तैके त्यादि यावदेष वृ - ष्यः परं योग इति नवमः। शतावर्या बिदार्या वेत्यादि। यावच्छर्करामधुसंयुक्तमपत्यार्थी प्रयोजयेदिति दशमः। घृतपात्रं शतगुण इ - प्रयोगात् पुरुषं कुलिङ्ग इ - व हृष्यति इत्येकादशः। सिर्षौक्षतोपला पलशलमित्यादि। यावच्छुद्धा उत्कारिकां कार्याश्चन्द्रमण्डलसन्निभाः इति द्वादशः। इदानीमुक्तानुक्त वाजीकरणसङ्ग्रहायाऽह - यत्किञ्चिन्मधुरं स्निग्धं बृंहणं मनसश्चैव तत् सर्वं वृ-

व्यमुच्यते। द्रव्यैरेवं विधैस्तस्मात् भावितः प्रमदां व्रजे-
दिति भावितग्रहणेनैतत् ज्ञापयति' यावत्सर्वात्मना
भावितं देहे द्रव्यं स्यात् तावत् गन्तव्यं न प्रयोगा-
नन्तरं शुद्ध्यादीन्यम्लत्वेऽपि शुक्रजननानि मध्वादी-
नि रूक्षाण्यपि यत्किञ्चित् मधुराद्येतद्विरोधी उच्यते-
प्रभावाद्दधिमध्वादीन्यम्लरूक्षाण्यपि वाजीकरणानि
न केवलं गुणभावादेव द्रव्याणि कारकाणि किञ्चिदपि
द्रव्यप्रभावश्चाचिन्त्यः। शास्त्रैकसमधिगम्य एवेति न
विरोधः। ननु चात्मवेगेन चोदीर्ण इति व्यर्थं' न हि पर-
वेगेनोदीर्णता सम्भवति। उच्यते- अयमभिप्रायः-या-
वदिच्छयोद्भूत रां हर्षकाष्ठामारूढस्तावत् प्रमदां
व्रजेत्। उक्तंच- नानुद्भूतहर्ष इति। किञ्च स्त्रीगुणैश्च
प्रहर्षितो भावभावसंवाहनादिभिरित्यर्थः। गत्वा स्नात्वा
पयः पीत्वा रसं वानुशयीत ना, तथा शुक्रं च बलमेव
च इति। ननु चार्धरात्रे स्नानादीनामयुक्तत्वादारम्भ-
वैयर्थ्यमुच्यते। चापलादनियतगामिनोऽपि प्रायशो दृ-
श्यते। तस्माद्यदा स्नानाद्यसम्भवन्ति तदेवं कर्त्तव्यमि-

द्वितीये(प्रथमःपादः)

यभिप्रायः। नवे - त्यां परतो नचैत्यादि। यावत्स्पृष्टमा-
त्र विशीर्येत। तथा वृद्धस्त्रियो व्रजन्तित्यत्र चिन्त्यते। द्वि-
दृष्टान्तोपादानम्। किं तटाकमिव काजलं जन्तुजग्धमिव
काष्ठमिति ब - - स्यानुसारतः - - त शुक्रत्वाद्वृद्ध-
स्योपक्षीणशुक्रदृष्टान्तेन दार्ष्टान्तिकासिद्धेरित्युच्यते।
बालवृद्धयोर्यद्यप्यल्पशुक्रत्वं तथापि तटाकस्याल्पजल-
त्वे त्यागादिपूरणं सम्भवति। तस्य हि कालुष्यक्षोभ-
णादयो भवन्ति। न पुनरत्यन्ततटाकविनाशः। एवं बा-
लस्याप्यल्पवीर्यत्वादयं वृद्धस्य त्वपचयादेवापचयो-
ऽभिगमने त एव शुक्ररूक्षकाष्ठस्येव जन्तुजग्धस्य स्पृ-
ष्टमात्रस्य विनाश इत्ययं विशेषोऽभिप्रेत इति। किं-
च बालस्य कफभूयिष्ठत्वात् शुक्रक्षयेऽपि नात्यन्त
श्रमेणोपस्तब्धत्वात्। वृद्धस्य तु शुक्रक्षयात् वातभूयि-
ष्ठत्वात् भूयो मातरिश्वा, प्यायितबलोऽसूनेव हरतीति यु-
ज्यते। दृष्टान्तद्वयं तृप्तस्यापि स्त्रियो गन्तुं नशक्तिरुपजा-
यते। तस्मादाह - भिरित्यादि। यावन्नारीणामरसङ्गत्वा-

दभिन्चाराददसेवनात् । क्षयोऽत्र शुक्रस्यैवाभिप्रेतो न य-
क्ष्मेति । कुतश्चेत्स्त्रियं स्त्र्यभिगमनशक्तिरुदेत्यत · पदे-
हसत्वबलापेक्षी हर्ष इति सत्वयोः स्त्रीत्वं । प्रवरावरमध्य-
विभेदेन भागेन तत्र समसुविभक्ताभिः सन्धिः सुविनि-
ष्टमांसशोणितः समप्रकृतिः सर्वैः सारैरुपेता यथोक्तप्र-
माणो बलिमध्येनैषां मध्यबलो हीनेन हीन · · क-
मापे प्रवरावरमध्यभेदेन तस्माद्देहबलं सत्वबलापे-
क्षते हर्षः । शक्तिश्च हर्षज्जायते । आपेक्षिकी शक्ति-
श्चाऽत्र स्त्र्यभिगमनलक्षणा । हर्षश्चाऽत्र मानसप्रसा-
दपूर्वको वराङ्गमथनस्येष्टः । न केवलं · · ·
वराङ्गगमनशक्तिरिति · · मवगतमिदानीं एत-
द्यत्र · · व्यवस्थितं कथं वा प्रवर्त्तत इति तदाचष्टे-
सर्वत्रानुगतं देहे शुक्रं संस्पर्शने तथा ।
किवद्रस इक्षौ । यथा दध्नि नवनीतं तिले · · ले-
स्येतदुक्तं भवति- नैकदेशे ऽपितु सर्वं व्याप्यावस्थि-
तं देहमिति । ननु च त्रिदृष्टान्तोपादानम् । किमेकेनैव

द्वितीये(प्रथमःपादः)

दार्ष्टान्तिकासिद्धिस्तुल्यत्वात् दृष्टान्तानां नानार्थात् स्त्रीदृष्टान्तोपादानेनोच्यते। त्रीन् दृष्टान्तैनैतज्ज्ञापय- ति- यथा दृष्टान्तनानात्वं तथा दार्ष्टान्तिकस्यापि नानात्वं। यथेक्षौ सर्वत्रानुगतौ रसौ मध्यमया चे- ष्टया आपिस्त्रीयते। एवं पुमानपि कश्चिदेवं विधो भ- वति। यस्य । यो क्रियया भवन्ति प्रवृत्तिरन्यधातोः अन्यस्त्वेवंविधः। पुमान्यस्य सङ्कल्पमात्रेणैव दध्न इव नवनीतमल्पेन प्रयासेनैव व्यज्यते। तथान्यस्य पुं- सः स्त्रीष्व इव महता प्रयासेन णाभिव्यक्तिर्नीयते। तस्मात्पुरुषनानात्वाविष्करणाय दृष्टान्तत्रयोपादान- मिति। ननु च देहे संस्पर्शने तथेति द्वयोपादानं न कञ्चनार्थं पुष्णात्येकेनैव पर्याप्तत्वा शनैर्लभ्य- ते' स स्पर्शनेनापि देहो लभ्यते। इत्युच्यते' देहस्य सकलार्थवाचकत्वात् केशादीनामपि ग्रहणं स्यात्' तदन्तर्भूतत्वात्तेष्वपि शुक्रमिति स्यात् प्रतीतिः त- न्निषेधा ज्वरचिकित्सितसम्बन्धो द्विविधः।जे-

बजमुक्तं स्वस्थोर्जस्करं व्याधिनिर्घातकरं च स्वस्थो-
र्जस्करं रसायनवाजीकरणतन्त्रे निर्लोठितः व्याधिनि-
र्घातकरणस्यावसरः सति च वक्तव्ये ज्वरः प्रा-
धान्यादग्रनुत्पन्नत्वाच्च जन्मप्रत्यययोरवश्यंभावि-
त्वात् प्राधान्यमग्रपाठायाग्रोत्पन्नत्वं कथं या-
वता कामादीनामभिघातनिमित्तानां च प्रागुत्प-
न्नत्वान्न शारीराणामित्यभिप्रायः ज्वरोपि —
र्थं न तदाश्रयत्वाद्वासवदत्तादिवत् ज्वरवचनम्'
कस्माद्यदि व्याधितः स्वयमुपदिशति सहास्यो
भवति। ज्वरशब्दस्य रोगपर्यायत्वादज्ञानशारी-
रव्याधिनिर्मुक्त इति यथास्थितवस्तुप्रकाश व-
श्च स्तुत्यास्तुताश्च प्रसन्ना श्रेयसा योजयन्ति विवि-
क्ताद्यभिधानादेतत् ज्ञापयत्येकान्ते सुप्रसन्ना
सासीनाश्च गुरवः प्रष्टव्याः। कृताञ्जलिग्रहणेन न
परीक्षाकरः किन्तु श्रेयोऽर्थि ति ग्रहणम्' कस्मात्त-
स्य प्रस्तुतत्वान्निदाने च निर्लोठितत्वान्न ज्वरस्य स-

र्वे रोगाभिधानात् विशेषज्वराभिधानप्रायाददो-
षः सन्देहो रुद्रकोपपरिग्रहाभ्यां प्रवृत्ते चिकित्सा-
सूत्रमनुक्तविषयनिश्चयार्थत्वाददोषदेहेन्द्रियमन-
स्ताविति, न तु प्रश्नो नाऽपि व्याकरणं नार्थगरीय-
स्त्वप्रख्यापनात् सर्वव्याधिवैलक्षण्यादारम्भः देह-
ग्रहणादिन्द्रियमनोग्रहणमन रिता पादाश्रित परितप्ते-
न्द्रियमनसि तप्येत कुबेरकोपघाते तदाश्रित पित्राभि-
घातवत् शरीरमनसोऽप्यधिष्ठानत्वादिन्द्रियाश्रयत्वादधि-
कं न देहेन्द्रियमनसां भिन्नत्वात्तद्यथा- अर्बुदादयो
दादयो मन आश्रिताः इन्द्रियाश्रितास्तच्छलया कुक्-
दयोरस्य युगपत्सर्वव्यापित्वमत्र तु क्रमः [स पूर्वं के-
वलो भूत्वा पश्चाद्दोषोऽनुबध्यते] तथा-
शारीरो जायते पूर्वं देहे मनसि ... भूत्वा
पश्चाद्दोषैरनुबध्यते, पूर्वं केवलः पश्चान्निजै व्यामि-
श्रलक्षणा इति नायमन्यतरस्तप्राने वर्तते। अपितु वर्त-
त एवायमाचार्यस्येन्द्रियतापोद्देशतोऽभिप्रेत एव-

भि रसनस्य चक्षुषोराकुलत्वादिभिश्चक्षुरिन्द्रियस्य रोमहर्षे वातातपासहिष्णुत्वेन स्पर्शनेन्द्रियस्य शब्दसह-त्वासहत्वाभ्यां श्रोत्रेन्द्रियस्य वैचित्र्यमरतिग्लानिम-नस्तापलक्षणमिति, मनसो विकाराणां अधिष्ठात-श्च सेन्द्रियस्तस्माद्रूय इति व्यतिरेकाग्रहणं साधु,नचे-दं शिष्यसूत्रमाचार्य एव केनचिदुपोद्घातेन शिष्यव्यु-त्पत्त्यर्थमासूत्रितमपि दर्शयति— अन्ये त्वन्यथा व्याख्या-नयन्ति, अधिष्ठानद्वयमे- देहेन्द्रियं च मनश्च देहे-न्द्रियमनसी,ते तप्तुं शीलं यस्य स तथा। देहेन्द्रियशब्दे-न स्पर्शनेन्द्रियमभिप्रेतम्, कुतस्तस्य व्यापकत्वात्तच्च हि सर्वेन्द्रियाणि व्याप्नोति, आचार्यकं हि तथे- न्द्रि-यमिन्द्रियाणामिन्द्रियव्यापीकं च त इत्यादि। सर्वरोगा-ग्रजत्वं शारीरानधिकृत्योक्तम्, देहेन्द्रियतापित्वेन बलि-त्वे सिद्धे बल्याभिधानमाशु संक्षेपत्वादिभि बले प्रधा-न- त्वं मारणात्मकत्वात् प्रलये ध्रुवम्, कथं शीताङ्-त्वात् तस्मिन् काले तस्य च प्रत्यात्मिकं लिङ्गं सन्तापो दे-

हमानस्य इति, न प्रलये च महत्तम इति वचनात्, अव -
स्थास्वन्येषांञ्च रूपत्वात् ज्वरस्येति। प्रकृत्यादीन्
रक्षापर्यन्तान् भगवन्वक्तुमर्हसीत्युपस्कारः, एते च प्रश्नाः
सकलेनाध्यायेन व्याख्यायन्त इति प्रश्नव्याकरणाय ज्व -
राधिकारे यद्वाच्यं तत् सौम्य - मिदमप्रतिज्ञातकथ -
नं ज्वरो विकार इत्यादि। न निखिलाभिधानात् पृष्टानपृ -
ष्टांश्च विधीनाचार्याः प्रदर्शयन्ति, निदानपूर्वरूपादिवत्
द्विदोष गुल्मोन्मादादिवत् संसृष्टलिङ्गानपरांस्तु गुल्मो -
सी नार्थमुन्मादप्रसङ्गः।

इष्टद्रव्यविनाशात्तु मनो यस्योपहन्यते।
तस्येष्टविषयप्राप्त्या सान्त्वाश्वासैश्च इत्यादि।

एको ऽर्थो दुःखलक्षणो नामपर्याययोरेकार्थत्वादयुक्तमपि -
धानं तुल्यार्थाभिधानम् अभिधानं पर्यायः। यथा सन्तिव -
नर्थान्तराणि पर्यायशब्दाभिहितानि एते च पर्यायाः सर्वे -
षां व्याधीनां सामान्या अपि सन्तापलक्षणस्यार्थस्य वि -
शिष्टस्य प्रतिपादनाय निहिताः कथं सामान्यशब्दाद्विशे -

षं अभिदध्यात् - प्रकरणपदविशिष्टार्थसन्निधानाच्चोक्ता अपि निदाने प्रसङ्गतन्त्रयुक्तिन्यायान्न पौनरुक्त्यमा - वहन्तीनामपर्यायशब्दयोरन्ये परिहारं वर्णयन्ति। यदि प - र्यायग्रहणमेव केवलं स्यात्, संशये वा तस्माद्विशेषणा - योपादीयते। नामपर्यायैरित्येतच्चायुक्तं, नात्र गुल्मवान् स्था - नपर्यायो, भीष्टो, स्य कृत्स्नदेहव्यापकत्वात् ज्वरस्य तस्मा - त्वयमन्यो ऽर्थः दुःखलक्षणो नामैकः सा ते विविधैरिति। के किमेतदुक्तं भवति - ज्वरादिभिरप्युच्यते सामान्यशब्दैर्वि - शेषशब्दैश्च यक्ष्मादिभिरिति युक्तम्। प्रकृतिरिदानीं व्याक्रि - यते। ज्वरस्य प्रकृतिरुद्दिष्टा। निदान उद्देशमात्रे सा च द्व - यी उत्पत्तिकृता स्वाभाविकी चोत्पत्तिकृता दोषाः शारीर - मानसाः, शारीरा वातादयो मानसो रजस्तमसी। स्वाभावि - की पञ्चत्वलक्षणा यमस्वभावेत्यर्थः। कुतः यस्माद्देहि - नं नहि निर्दोषज्वरः समुप - विग्रहवतां स्वपरतन्त्र - योः सम्प्रत्ययात्। इच्छत्युभयमेतत्, ज्वरो व्यामिश्रलक्षणः। तथा ज्वरेणाविशता भूतं नहि किञ्चिन्न तप्यते।

शिवं शिवाय भूतानां स्थितं ज्ञात्वा कृताञ्जलिः।

क्रोधाग्निरुक्तवान्देवमहं किं · · ·

धर्माविग्रहवतां, परतन्त्रेपि ज्वरस्त्रिपादस्त्रिशिरा षड्भुजो नवलोचनः ... प्रहर इति देशान्मोच्यते, तस्य देहस्वस्वामिभावेन सञ्चारी विकारी निर्विकारः, परस्वात्मेति वचनादव समादाधिका-र्यौ · · · स्वदेहिवत् गुण · गुणवत् गुणश्च गु-णवादीति तन्त्रयुक्तिन्यायात्, अथवा कस्माज्ज्वरस्य प्रकृ-तिर्दोषाः शारीरा मानसाः, यस्माद्देहिनमात्मानं निर्दोषं निर्विकारज्वरः समुपसेवेत इत्येतन्न संशयबीजस्याभा- · · · दुःखेनायोगा तस्मादन्यथा व्याख्यायते - तत्प्रका-रेणैवायमर्थो निर्लोचितः-

सत्वमात्माशरीरं च त्रयमेतदधिकरणं। तस्यथा संयो-गपुरुषस्येष्टो विशेषो वेदनाकृतः। तथा वेदनानामधिष्ठा-सेन्द्रिय इति वचनात् पुर्यष्टकस्य सम्बद्धस्य सर्वैर्ध-र्मादिभिरिति व स्वाभाविकीं व्याचिख्यासुराह- क्षयस्तम इत्यादि, क्षयहेतुत्वात् क्षयामोहनात्मकत्वा तमःसन्तापहे-

त्वात् ज्वरो मारणात्मकत्वा मात्मको यमसम्भाव इ-
त्यस्मात् पञ्चत्वप्रत्ययान्तरणामिति। ननु स्वधर्मक्षयनि-
मित्तं प्रायशामतआह- क्लिश्यतां स्वेनकर्मणा स्वेनाऽधर्मे-
णेत्यर्थः अन्ये तु यमात्मजमित्येवं पठति व्याख्याय-
नाम इति द्वन्द्वं यमो प्रसूत इति यद्वत्, तस्माद्यमाच्छारिर-
मानसदोषयमाल्लोभादिद्रोहाद्वा, अथवा यमात्मजा यमसून-
व इति, कथं रुद्रकोपादुत्पन्नानां यमात्मजत्वं परिग्रहात् वी-
सनस्वभावाद्वा यमात्मजत्वमित्यस्य प्रकृति प्रोक्ताः, एवं प्रकृति-
रुक्ता, द्विविधा यद्वदिति, वृद्धा ब्रुवते इति शब्दः समाप्त्यर्थो
वेति प्रवृत्तिरिदानीमुच्यते, ननुच प्रवृत्तेः प्रागुपादानं ततः
प्रकृ नां किमयं तन्त्रस्य कर्तव्यत्यय उच्यते - श्लोकब-
न्धानुरोधमुक्त्वा नान्यं हेतुं पश्यामः। शिष्यसूत्रत्वाच्चादो-
षः। शिष्या हि सन्दिग्धमतय एव प्रश्नयन्ति। यदि तेषांय-
था वस्तुज्ञानं स्याच्छिष्यतैव हीयेत। परिग्रहान् वृत्तिरुक्ता-
विस्तरेण रुद्रकोपादुच्यते। निदाने संक्षेपेण- ज्वरस्तु खलु
महेश्वरकोपप्रभवे विमाने भ्रश्यति तु कृतयुगे केषांचिद-

त्यादानात् साम्प्रतिकानां शरीरगौरवं। गौरवाच्छ्रमः। श्र-
सञ्चयः सञ्चयात्। परिग्रहः परिग्रहात् लोभः प्रादुर्भूत इ-
ति। यावज्ज्वरादिभिर्व्याधिभिराक्रान्तानीति विस्तरोऽत्र
तु रुद्रकोपाद्धि स्रवति प्रवृत्तिराख्याता। प्रवर्त्तनं प्रवृत्तिः।
प्रथमं जन्म यदि तन्नाम भविष्य दपकृत्स्यत। ग्रन्थस्तु
स्पष्ट एव तेन नव्याख्यायते।

शिवं शिवाय भूतानां स्थितं ज्ञात्वा कृताञ्जलिः।

उक्तवान् ज्वरं किं करवाण्यहं।

तमुवाचेश्वरः क्रोध ज्वरो लोके भविष्यसीति।

अनपराधिनि मनुष्यलोके केन क्रोधव्रतमास्थित इत्येतच्च
विरुद्धम्। उच्यते भगवता— योगबलेन भ्रष्टा प्राणिनो लो-
भजेनाऽधर्मेण परिगृहीतास्तेषां ज्वरोत्पत्तिः भाविनी दृष्टा।
ज्वरं नियुक्तवान्। उत्तीर्णव्रताभिधानात् ति जन्मादौ
निधने च तथापचारान्तेषु चापरचारान्तराणि तन्निदानानी-
त्यर्थः। उक्ते, प्रकृतिप्रवृत्तिप्रभावस्यावसरः। अथ कोऽयं प्रभा-
वः। भवनं भाव उत्पत्तिरात्मलाभो जन्मप्रकृष्टो स जन्म-

सामर्थ्यं, शक्तिसाधारणापूर्वज उत्पत्तिविशेष एवाऽयद्भुत-
स्तथालक्षणकार्यानुमेयः प्रभावशब्देनोच्यते। यथा सन्ताप-
स्याऽरुचिरिति छेदः। तृष्णा साङ्गमर्दा हृदि व्यथा च साङ्ग-
- यत्र योज्यते, ऊष्मावैत्यन्तकाले, स आह - निधनेच
महत्तम इति। प्रभावोऽयं ज्वरस्य सन्तापोऽन्यथा यदि पित्त-
स्यायं केवलस्य धर्मः स्यात्, वातश्लेष्मारब्धयोर्न स्यान्ननु
देहेन्द्रियमन ... किमत्र सन्तापोऽनापिधायाया,
ऽपि तापवाचित्वाचत आह -
वैचित्र्यमरतिर्ग्लानिर्मनसस्तापलक्षणमिति।
कथमेतदवसेयम्, ज्वरस्यैवायं प्रभावो न कारणकृत इति।
आमलक्षणेऽपि प्रदर्शनात्, ज्वरप्रत्यात्मिक
लक्षणमिति सर्वभूतोपतापात्, ज्वरेणाविश-
ताभूतं नहि किञ्चिन्न तप्यते, भूतं मानुष इत्यभिप्रायः। तदा-
रम्भकाणि भूतानि वा सर्वप्राणिन इतिवत्, न
भ्रमरकवारकसन्निकर्षाणामतापलक्षणत्वान्ना-
न्तःसन्तापादिति ब्रूमः। यदि पीडाऽत्र सन्तापशब्देनाभिहिता स्यात्,

तस्मादत्रेष्टानि प्रभावामलक्षणयोः

को विशेषः, उभयत्र सन्तापस्याविशिष्टत्वादुच्यते, विशि-

ष्टलिङ्गसहचरितत्वादन्यत्वं तृष्णादिभिः प्रायणकाले च

तमोरूपत्वात्, अन्ये च रोगाः शरीरं मनो वा पीडयन्ति, अ-

यं पु- इति साधु, त्रिः सङ्ग्रहप्रणयनं किमर्थमित्यस्य

प्रकृतिं प्रोक्तेत्येकः सूत्रस्य प्रकृतिश्च प्रवृत्तिश्च प्रभावश्च

निदर्शित इति प्रकरणस्याऽध्यायस्य यथाक्रमं यथाप्रश्नं

उक्तं ज्वरं चिकित्सितमिति स्य- प्रदर्शिताव न्निवेशतन्त्रं

च संस्कृतमाचार्येणेत्यदोषः। अथ किं कारणमित्याह-

निदाने कारणान्यष्टौ पूर्वोक्तानि विभागशः। इति,

ननु प्रकृतिकारणयोरन्यतराभिधानाविशेषात् प्रक्रियते, -

स्मादिति प्रकृतिः कारणशब्दस्तव्युत्पादितैः करोतेरपेक-

र्तृत्वे दीर्घत्वं शास्ते, शौनकीरित्युभयो र्हेत्वर्थस्याविशि-

ष्टत्वादत्र समाधिमाहुः, कार ~~मान्तव्यथावातात्पित्तात्~~

~~कफाद्वातपित्ताभ्यां वातश्लेष्माभ्यां पित्तश्लेष्मभ्यां वातपि-~~

~~त्तश्लेष्मभ्य आगन्तोरष्टमात्~~ ष्वभिप्रेतं प्रकृतिलं च सकार्ये-

षु दोषेष्वेवमपौनरुक्त्यमेतच्च नोपपद्यते। यतो ग्रन्थोऽव्या-
ख्यायते, ग्रन्थ एवं व्यवस्थितोऽष्टाभ्यः कारणेभ्यो ज्वरःस-
णान्नव्यथा वातात्पित्तात्कफात् वातपित्ताभ्यां वात-
श्लेष्माभ्यां पित्तश्लेष्मभ्यां वातपित्तश्लेष्मभ्य आगन्तोरे-
ष्टमात्कारणात् रूक्षादिष्वशब्दे कल्पना आर्षीभविष्यती-
ति चेद्यतो रूक्षादीन् यन्दोषाणाम् मलाश्च इति
तन्न इह वातादयो विश्वस्य व्याधिगणस्य कर्त्तारो न ज्वरस्यै-
वैकस्य तस्मादन्यथा व्याख्यायते। प्रकृतिश्च द्विविधा व्या-
ख्याता। औत्पत्तिकी स्वाभाविकोञ्च। तत्र संभ-
वमात्रं व्याख्यायते। कारणं त्वनन्तरोत्पादकम् सम्प्राप्यन्तं
यतोऽनन्तरं कार्योत्पादो ज्वरपूर्वरूपस्य निदानं, उक्तत्वान्मु-
खवैरस्यमनन्नाभिलाष ते, तेषां कदाचित्तत्कत्वान्नि-
दानेरितानामेषां अवश्यं तयाभावः, वैकृत मत्पश्चैत्यनेनो-
न्मादपूर्वरूपव्युदासं करोति, देवगोब्राह्मणानां हिंसारु-
चित्वादेः अरिष्टम्यु निमित्तत्वादस्य पुनः सनिमि-
त्तत्वमधिष्ठानद्वयं व्याधीनां प्रतिपादितमेव, किमिह पु-

गुरुकेत्याः, अस्य द्व्याश्रयत्वादन्येषां पुनरेकाश्रयत्वमि-
ति बलकालोऽपि निदाने प्रदर्शितो दिव - इत्यादि। नि-
दानस्थानमनिदानस्थानमनिदानशब्देनेष्टं, किन्तु यत्र य-
त्र निदानोक्ति र्यथा वातप्रकोपनोक्तान्यासेवमानस्य क्षि-
प्रं वातप्रकोपमापद्यते। न तथे - पित्तश्लेष्मणो-
रप्युदाहार्यम्। एतदुक्तं भवति - तस्मात् प्रकुपिता दोषाःस्वे-
षु स्वेषु कालेषु व्याधिं विदधाति, बलं वा कुर्वद्भिः। आम-
लक्षणं तु व्याख्यातः। प्रभावव्याख्याप्रसङ्ग

त्यस्यावसरः। विधिः प्रकारो भेदो विशेषः। विविधो
विधिभेदेन ज्वरः शारीर इत्यादि। यावत् भिन्नः कारणभे-
देन। पुनरष्टविधौ ज्वर इत्यादिश्च व्याकरोति। द्विविध-
ग्रहणम - कालबलादित्यस्या-
यमर्थः। दोषश्च कालश्च दोषकालौ तयोर्बलाबलान्न पुन-
र्व्युत्क्रान्ताभिहितं दोषज्व - त्वे यथावसरं प्रति-
पादयिष्यति॥ भाष्ये सुप्रणीतसूत्र - मानद्वयश्च दोष-
बलात् स्रोतोभिर्विसृता दोषाःगुरव इत्यादि। निदाने च

विस्तरोक्तमबलत्वं च प्रकृतिदूष्याद्यथा
वे च यथावसरं प्रतिपादयिष्यति। भाष्ये सुप्रणीत
सूत्रसङ्ग्रहभाष्ये चेदं तन्त्रम्। अन्ये त्वाचक्षते, दोषभेदात्
समसम्प्राप्त्यानिदाने विषमविभेदभिन्नो ज्वरस्‍ क्लिष्टक्लेश -
तो व्याख्यातो दोषोत्कबलाबलत्वेन च सन्ततादिभेदात्
पञ्चविधो भवति 'न वातादिजातिं जहाति' अत्रोच्यते- ए
ते ज्वरादयो वृद्धैर्दोषैरारभ्यन्ते न क्षीणैः क्षीणानान्तर्ज -
ननाशक्तेः ... ष्णमुष्णेन संवृद्धं पित्तं शरदि कुप्यति।

तथा द्विश्लेष्मौषधीभिश्च मधुराभिश्चितः कफः।

हेमन्ते सूर्यसन्तप्तः स वसन्ते प्रकुप्यति ॥

तथा- संवृद्धिं बलकालं च प्राप्य दोषस्तृतीयकः।

... त्यादि। ननु चैवं व्याख्यायमाने व्याहन्यते, इदं यथा
वृद्धैस्तथा क्षीणैर्व्याधयः पञ्चविंशतिरिति, तन्न क्षीणानां
स्वकर्महानिरेव व्याधिः। क्षयवृद्धी दोषाणां दो ... नि -
त्याम्नान ... ने समसम्प्राप्त्या विषमसम्प्राप्त्या चेति। तत्र न -
नु सन्ततादिव्यतिरेकेणको ऽन्यो ज्वरो यस्य समसम्प्राप्त्यो -

पादः स्याद्विपर्ययज्वर इति चेद्विषमज्वर एवान्यच्चातुर्थ
कविपर्यय इति सोऽप्यत्रैव निर्दर्शिता । ब्रूमः
स्रोतोभिर्विसृता दोषा इत्यारभ्य यावत् त्रिविधो धातुरेकै
को द्विधातुस्थः करोति यमित्येतच्च बालिशजनाविप्रका
शनमात्रम् । दोषबलाबलको ... दस्य । ननु प्रकृतिदूष्य
योरपि कार्यः परिग्रहः दोषकालवदुच्यते । दोषकालादिबला
दादिशब्दो लुप्तनिर्दिष्टः । स्यान्तिच्चादिमध्यान्तकोपाः । व्याख्ये
च प्रदर्शनात् कालदूष्यप्रकृतिभिर्दोष स्तुल्यो हि । सन्तत
मि ... लग्रहणादवरोधं वर्णयन्ति - तेषां गम्भीरोऽभि-
प्राय इति न शक्यतेऽनुसर्तुमिति । सन्ततसततयोरेकार्थत्वं
किल, व्याकरणे - सम्भश्च वा हिततयोरित्युच्यते । तत्र विकल्पेना
लोपो दर्शितः न पुनरर्थः । पदात्पदात् वैद्यव्यवहारात्
स च संज्ञातः परिभाषातः प्रकृतिप्रत्ययविभागात्तन्त्रान्तर
तो रूढेश्चात्र स्वतन्त्रपरिभाषातो, बगतिरहोरात्रे सन्ततको
द्वौकालावनुवर्तते । न च स्वतन्त्रपरिभाषा न व्याप्ति -
बहुलादिगादयो विकल्पवाचकाः, व्याकरणेन च लोके

बद्धेकादीन्विकल्पे प्रयुङ्क्ते । तस्मात्सन्ततसततयोः भेदो ऽनेका-
र्थत्वे ऽप्येकशब्दप्रयोगः समानो रोगशब्दो दोषेषु व्याधि

चेदेतत्तृतीयकचतुर्थकयोः समासकरणं विषम-
ज्वरख्यापनार्थम् । वक्ष्यति- कर्मसाधारणं जह्यात्तृतीयकच-
तुर्थकौ । आगन्तुरनुबन्धो हि प्रायशो विषमज्वरः । इति ।

वाताद्दोषे
क्रमं दर्शयति -दे अष्टमं पूर्यति । कारणभेदादेवं
ऽपि इति शारिरमानसावुक्तेनाकिन्तयोरन्य व्याधिवत्
व्यवस्थापि । उतान्यथेत्येत आह-

शारिरो जायते पूर्वं देहं मनसि मानसः इति ।

क्रमं दर्शयति -देवे मानसश्च । पश्चाद्देहमनुब-
ध्नाति । वैचित्र्यमरतिरित्यादि । सामान्यमानसस्य लक्षणं ।
वैशेषिकं तु वक्ष्यमाणकं पूर्वरूपावगतिर्यथास्य विशेषो-
क्ता तथापि शीतवैकृतमल्पमित्येतन्मानसस्य

व्याख्यं वातपित्तकफात्मक वातकफा-
त्मकं तु तीति विरामं गच्छति वा, अथवा पूर्वोक्तन्यायेन
निग्रहवत्त्वावदोषाद्द्वयं । व्यामिश्रलिङ्गः इति । वक्ष्यमाणल-

क्षणस्य लिङ्गपर्यायत्वात् व्या   त्मक इत्य-
र्थः। सौम्याग्नेयत्वं च सर्वज्वरेषु यथासम्भवं योज्यम्।
कुतः जातिद्वयानतिक्रमात्, आहवोयो योगवाहत्वमयु-
क्तं, शीतत्वान्नान्यसिद्धान्तवदनुष्णशीतत्वमुच्यते- आ-
प इव प्रकृतिशीतलो यो   दन्यत्वं सुरभित्वादि-
त्वं बिभर्ति। विजिताश्रयात्यर्थशीता भवति। योगवाहव-
चनादेतत्ख्याप्यते, योगवाहः परं वायुरित्यादिना। दान्त-
र्वेगबहिर्वेगव्याकरणमन्तर्दाहादिश्लोकद्वये   केचि-
त्पठन्ति, तच्छ्रसनमिति पठनीयम्, कस्मात्तन्त्रान्तरे च-

गम्भीरस्तु ज्वरो ज्ञेयो दाहेन तृष्णया।

धून - त्वेन चात्यर्थं श्वासकासोद्भवेन च। इति।

इदानीं प्राकृतं वैकृतं   याह- प्राकृतः सुखसाध्यस्तु
वसन्तशरदुद्भवः। इत्यादि, ननु च साध्यासाध्यलक्षणं
वक्ष्यमाणकं कस्मादत्राभिधीयते- उच्यते, बहिर्वेगस्य
साध्यत्वाभिधानेनान्तर्वेगस्य कृच्छ्रसा-   नात्तदनुष-
ङ्गात् प्राकृतस्यापि वातजस्य कृच्छ्रसाध्यत्वं ख्यापितं व-

ध्यति च प्रायेणानिलजो दुःख इति। कस्माच्चायं प्राकृतं यत आह— कालप्रकृतिमुद्दिश्य निर्दिष्टः प्राकृतः। इति। काल इत्यर्थः। तु शब्दोऽवधारकः। प्राकृतो वसन्तकश्शरद्भवः साध्यं वा। योगव्यवच्छेदोऽवोत्सर्गश्चायं तत्रापि यदि हेतुभिर्बहुभिर्जातो बहुभिः लिङ्गैः बहुलक्षणो भवति। नासौ साध्य इत्यपवादः॥ द्विविषयमुत्सर्गोऽभिनिवेशते। वैकृतः पुनरल्पहेत्वादिजोऽपि कृच्छ्रसाध्योऽसाध्यो वेति ख्यापितं भवति। किमर्थमिदमुष्णमुष्णेन संवृद्धमित्यादि। यावता कालस्य मिथ्यायोगायोगातियोगाः व्या दुःखानां कारणमिति व्याहंसि। तदयं विहितव्यत्ययाचारात् प्रत्युच्यते, अन्यथाऽस्य नैरर्थक्यं स्यात्। विहितस्वस्थवृत्ताचाराणां प्रायशः कर्मजा व्याधय उत्पद्यन्ते। त आह- जितेन्द्रियान्नानुपतन्ति रोगास्तत्का न्ते। दैवमित्यादि। प्राक्तनं च कर्म दैवशब्देनोच्यते। तस्मान्न व्याघातः। विहितव्यत्ययाचारतामेव ख्यापयन्नाह— उष्णमुष्णेन संवृद्धं पित्तं शरदि कुप्यति। चितःशीते कफश्चैव वसन्ते

मुदीर्यते. इत्ये - स्वम्लपाकाभिर्रित्यादि भाष्यम्। ननु
च प्राग्वसन्तस्य सूत्रितत्वात् कस्मात् प्रागभिधानं शरद
उच्यते ।व्याधेरस्य पित्तात्मकत्वेनाम्नानादूष्मा पित्ताद्द-
ते नास्ति ज्वरो नास्त्यूष्मणाविना। प्र - स्यात्प्रकाराद्वेत्यन-
वद्यं उष्णं पित्तं सवृद्धं सञ्चितमित्यर्थः। उष्णेन खरतराकि-
रणसन्तापेन कुप्यति। समानगुणत्वात् कोपश्च विलयनं
कार्यारम्भादिमुख्यं वेति केचित् तन्न - र्यदर्शनाद्यथा-
ह सुश्रुताचार्यः- सञ्चितानां दोषाणां स्तब्धपूर्णकोष्ठता,
पीतावभासना मन्दोष्मताचाङ्गानां गौरवमालस्यंचेति लि-
ङ्गानि। तत्र प्रथमः।क्रियाकालास्तस्माद्विलयनं कोपः स-
न - विपत्यर्ककिरणप्रविलायितपित्तं।पैत्तिकान्व्या-
धीन् जनयतीति ज्ञापितत्वाच्चेतः शीते कफो वसन्ते समुदी-
र्यते - कानादग्राहिसूत्र - नचैवशब्दाभ्यामुष्णेन भा-
स्करसन्तापेनेति दर्शयति- कुतः समान - नच
नशीतेन - दर्शयन् भाष्यमाह-
वर्षास्वम्लविपाकाभिरोषधीभिः सञ्चितं पित्तमिति न पापा-

मम्लपाकित्वं अन्यत्र ज्ञापितम्, वर्षासु पुनराग्निमान्द्य
मधिक- शालमापा
पाकस्य सम एवाग्नौ भवति, अत्यर्थोऽन्यथौन्कं च वर्षास्व-
ग्निबले हीने कुप्यन्ति पवनादयः इति, वचनात्तस्मादिहि-
तन्यत्ययाच्चाराणांम मानगुणमीरकं, शरद्यादि-
त्यतेजः प्राप्य विलीनमुत्क्लिष्टं ज्वरं जनयति सन्ततं, कुतः संश-
ब्दासञ्जनादाश्वासितद्रागिति नान्यत्तीविवकालं प्रतीक्षते
आचार्यकं हि, वर्षाशीतोचिताङ्गानां सहसैवार्करश्मिभिः,
चितं पित्तं प्रायः शरदि कुप्यति, अत एवातपत्यां शर-
दि विधन्ते धाराधारात्यये कार्यमातपस्य च वर्जनमिति, त
स्य च पित्तस्यानुबलं कफोनुशब्दस्यायमर्थः, यथाप्रवृत्त-
क्रियस्य स्वतन्त्रस्य पि पश्चात् बलमनुबृंहयत्येव, श्लेष्मा
प्रकृत्यैव सविसर्गस्य स्वभावेनैव दक्षिणायनस्याप्यायना-
त्मकत्वात्तत्र नानशनात् भयं, तपनं हि पित्तश्लेष्मणोः प्रत्य-
नीकं, शरच्च विसर्गमियो श्चैकमुरवैव चिकित्सेति, येपि प्रकृत्य-
तिविसर्गश्चैवं पमति तेषामपि परमार्थतो नार्थभेदो, अत्रो-

त्किभेदात् । अद्भिश्चैवौषधीभिश्च मधुराभिश्चितः कफः ।

सामान्याद् र्यसन्तप्तः स वसन्ते प्रकुप्यति ॥

विलयं यान्तीत्यर्थः यतः कार्योन्मुखीभूतः तस्माद्धितत्य-

त्यशाचाराणां वसन्ते कफजो ज्वरो जायते । नचैवं कर्त्तव्यं

कफाज्जायते यो हि कफात्सं नातं कुर्वन्नेतज्ज्ञापयति-

स्वतन्त्रश्लेष्मैव चितो नान्यौ दोषाविति । ननु च सामान्यं व-

र्धकमुक्तं सर्वदा सर्वभावानां सामान्यं वृद्धिकारणं तथा

समानगुणाभ्यासो हि धातूनां वृद्धिकारणं तद्व-

गतस्तयो भास्करस्य श्लेष्मणस्त्वसमानाः कोपहेतवः । कथं

अथाऽसमाना अपीष्यन्ते ऽकोपका एवमन्येभ्योऽपि तीक्ष्णो-

ष्णादिभ्यश्चित्रकमरीचादिभ्यः कोपं प्राप्नोति । नचेष्यते अ-

तिचेत्तन्न- रसवीर्यविपाकानां सामान्यं यत्र लक्ष्यते ।

विशेषः कर्मणां चैव प्रभावस्तस्य स स्मृतः । इति ।

आम्नानाद्वयं ब्रूमः समानैर्वृद्धिराधीयते । अपितु विलयनमा-

त्रं क्रियते यावन्न प्रपञ्चतां उपय र प्रवृद्ध्यामभिर्हविर्व-

दग्निनेद्धेन क्षयमेव नियतेन वृद्धिं तस्माद्विलयनमात्रमेव

कोपः नापि विलीनं प्रसह्य स्वावस्थामास्कन्दति, ननु च
वायोरपि कोप उक्तस्तस्य कथं विलयन   वयवक्षोभ-
लक्षणं ब्रूम इत्यनवद्यमादानमध्ये तस्यापि वातपित्तं प्र-
वेदित्यादानमध्यो वसन्त एव न कर्तव्यमादानग्रहणं तत्
क्रियते ज्वरव्यवच्छेदान्न च ज्वर एवायं विधिः   च
मध्ये च ज्ञात्वा दोषबलाबलज्वरस्य प्रतिकारयेत् किं
वसन्त एव न शरद्वसन्तयोस्सर्वत्र विद्वानिति . पण्डितैर्वेद-
नीयं च दोषबलाबलं नन्वत्र लङ्घनात् क्षयं कस्मान्नो-
क्त-   मादानत्वादादानं हि क्षयहेतुः यतो
वातपित्तयोश्चानुबलत्वं तस्मिन्नन्वयसञ्चितयो र्वातपित्तयोः
कथं प्रकोपः . स्निग्धाम्ललवणाद्युपयोगात् पित्तस्य शै-
त्यात् वातस्येति चेत्तन्न प-   केण च श्लेष्म
-        नातिभूतत्वात् पित्तं न हीयेत . उक्तं च-
विरुद्धगुणसंयोगे भूयसाल्पमव   जियतेत्यन्तमि-
ति वायोः पुनर्यथोचितेन्धनात्मकेन प्रकोप उक्तो न चयः .
कथ-   प्रकोपश्च यः पूर्वकोप-

चयपूर्वकिश्च। अन्यथा प्रावृड्विध्या सेविना शरदि द्वे-
स्याग एव प्राप्नोतीति सञ्चयोपहता दो- -
- रित्याम्नानात्। शर ध्विन्त्वे विध्यंच वर्णयन्ति शा-
स्त्रकाराः। संशोधनं संशमनंच संशोधनं चयपूर्वकं प्रकु-
पितस्य तिक्तस्य सर्पिषः पानं विरेको रक्तमोक्षणमिति।
कालस्वभावाद् ~~विध्यं प्रदर्शितम्। काठिन्यान्यूनभा-~~
~~वाद्दोषोऽल्पःकुपितो~~ कोपस्तदपजयार्थं संशमनं विधिमु-
पदिष्टवान्। तत्रान्नपानं मधुरं लघु शीतं सतिक्तकम्।
पित्तप्रशमनं सेव्यमित्यादि। वृद्धवत्साचार्येणापि उक्तानु-
क्तं विधिं समुच्चिन्व- विध्यं प्रदर्शितम्। काठिन्या-
न्न्यूनभावाद्दोषोऽल्पःकुपितो महान् पथ्यै मृद्वल्पतां नीतो
मृदु दोषकरो भवेत्। अस्यायमर्थः। काठिन्यात् कुपित-
श्चयादित्यर्थः। पथ्यै न भावादप्रचयात् कुपितोऽल्प-
तरत्वं नीतो मृदु दोषकरो भवेत्। ये हि लिखितानुसारिणः
तान् प्रति चिन्तैव नास्ति। तस्मादादानस्य शोषणात्मकत्वा-
दाग्नेय पित्तयोरल्पीयान् कोपोऽत एवाऽनुबन्धान्त्वम-

न्यथा यदि स्वतन्त्रौ प्रकुपितौ स्याताम्। स्वयमेव ज्वरं कुर्यातान्। अत्र केचिदाहुः—य आदौ वसन्तस्य सङ्क्षेपम —   नयोर्मध्ये ते वासोऽन्यथादानसामर्थ्यादल्पबलत्वं श्लेष्मण उत वा। य आदौ जायते ज्वरः। न तस्य बलीयस्त्वं। कुतो यस्मान्नहि मानी मृदुमात्रो भास्वान्वि -   नमादिदिवसेषु यदोत्तरोत्तरं पटीयसी मध्ये ऽन्ते वा विलयनशक्तिर्भवति। भास्वतस्तदा विलीनः प्रसारणादिसमर्थौ वातासौ बलीयांसं ज्वरं जनयत्यत ए-व ऋत्वृतुसन्ध्यौ वसन्ते च   तेनायमेकान्तः पक्षद्वयेपि प्रकृतिदूष्योपचारविशेषादाहितशक्तिर्यथोक्तान्न्यायात् विपर्ययेणापि दोषो ज्वरं करोत्यमुं चार्थमवगमयंश्चा-स्त्रकारो निहितपानादावन्ते च मध्ये च ज्ञात्वा शरद्वसन्तयोर्विद्वान् ज्वरस्य प्रतिकारयेत्। एवा च परिभाषाऽन्येष्वप्यातङ्कान्तरेषु द्रष्टव्या। कस्माच्चायं प्राकृतोऽत आह—प्रकृतिमुद्दिश्य निर्दिष्टः प्राकृतो ज्वर एको विशिष्यते -   पावधारणार्थमाह— प्रायेणानिलजो दुःखहेतुत्वात् दुःखकृ-

च्छ्रसाध्य इत्यर्थः तस्मान्नैकमुखत्वाच्चिकित्सायाः ज्वरा-
स्तु प्रायशो ऽस्थामाशयसमुत्थः तत्समुत्थानां व्याधीनां
शस्तानि तानि च वायो नेष्यते। वर्षासु चादानदुर्बलदे-
हानामग्निमान्द्यं भूयो दोषैः क्रियते तन्निमित्तः सर्वदो-
षप्रकोपो ऽतो ऽनेकमुखप्रतीकारत्वाद्दुःखप्रा - पित्ता-
तजो दुःख इत्याह - किं स एव वर्षजो दुःखो ऽत आह - का-
लेष्वन्येषु वैकृतः प्राकृतयोः शरद्वसन्तयोः कारणमभिहि-
तम्। सुखसाध्यत्वं चास्य वैकृतस्य को हेतुरत आह -
ते सम्प्रदर्शितम्। रूक्षोष्णगवदियो यथावत् सम्य-
क् प्रकाशिता इत्यर्थः। साध्यासाध्यलक्षणायाह - बलवत्स्व-
ल्पदोषेषु ज्वरः साध्यो ऽनुपद्रवः इत्युपद्रवास्तन्त्रे न ज्ञापि-
तास्ते ज्ञात मूर्च्छा-
ङ्भेदपिपासारोचकाः कृच्छ्रविट्कता चेति दशोपद्रवाः ज्वरमु-
पद्रवन्तीत्यारभ्यायासाध्यमाह - हेतुभिर्बहुभिर्जा -
प्राणान्तकृदिति छेदः ननु यो हेतुभिर्बहुभिर्जा-
तः स बहुलक्षणा एव भवति किन्तदुक्तयोच्यते - रोगाणां सम्प्रा

त्युत्पत्तिविशेषानुबन्धादिभ्यो वैश्वरूप्यं स्वैः स्वैर्हेतुभिः प्रकुपिता वाता   गणस्य न कर्त्तारो भवन्ति। प्राक्तनकर्मापेक्षाद्यदा विशिष्टां यथोक्तां सामग्रीं सम्प्राप्तिलक्षणां आस्कन्दन्ति तदा ज्वरमभिनिर्वर्त्तयन्ति. ते च नाऽवश्यं न च बहुलक्षणं कुर्वन्ति। कदाचिद्वायुरेक   चित्सर्वाणि दूष्यादिसहकारिकारणसान्निध्याभ्यां बहुबहुलक्षणका अनैकान्तेन बहुलक्षणा एवोत्पद्यन्ते। तथाहि– तत्रान्तरवचः, एकद्वौ त्रीन् बहून् वापि देहे ध्यात्वा विकारांस्तु कुपिताः पवनादयः, एवं पित्तश्लेष्मणोरपि संसार्यम्। यश्च शीघ्रमिन्द्रियानाशनः, सोऽप्यसाध्यः शीघ्रं य उत्पन्नमात्रः चिकित्स्यमानोऽपीन्द्रियशक्तिरूपादिग्रहण लक्षणपक्षया अन्येऽपि रोगा उपेक्ष्यमाणा असाध्यतामारोहन्त्युक्तं हि। अणुप्रथमं भूत्वा रोगः पश्चाद्विवर्धते इति। एतदुक्तं भवति– आदावेव बहुलक्षणो यश्च शीघ्रमिन्द्रियनाशनः   यमपरः सप्ताहाद्द्वादशाहाद्वा दशाहात्तथैव च। सप्रलापभ्रमश्वासस्तीक्ष्णो हन्याज्ज्वरो।

नरमिति, न चोत्तरेण सप्ताहं दशाहद्वादशाह एवेत्यनेन पुनरुक्तशङ्का, तस्य ... श्यात्वन्त्य ... नियमेन मारयति सप्ताहात्सप्रलापो वाताधिक: सभ्रमो दशाहात्पैत्तिक: सश्वास: कफाधिको द्वादशाहात् कस्माद्व्यवस्थितविकल्पश्चायम्। क्षिप्रमध्यचिरकारित्वाद्वातादीनां यद्येव - दशाहेन पवनाद्य: प्रलापभ्रमश्वासविशिष्टा मारयन्ति। उच्यते। वाशब्दप्रणयनादयमर्थ:, सप्ताहादर्वागपि दशाहात्पूर्वमपि द्वादशाहात् परेणापीत्येषो;र्थो विवक्षित:, तन्त्रकाराश्चामुमर्थं प्रदर्शयन्ति।

नवम्येकादशीञ्च या।

एषा त्रिदोषमर्यादा मोक्षाय वधाय च। इति।

यच्चोक्तं वातपित्तकफा: यथासंख्यं प्रलापभ्रमश्वासै: मारयन्तीति. तन्न वातेनापि भ्रम: पठ्यते, दण्डक - नापि प्रलापस्तन्त्रान्तरे पठ्यते-

प्रलापो वक्त्रकटुता मूर्च्छादाहो मदो भ्रम:।

पीतविण्मूत्रनेत्रत्वमुपैन्ति ... के शोष एव च। इति।

श्वासस्तु त्रिभिरपि तस्मावितयमपि प्रकापादिकं वाता-
धिके श्लेष्मादिके पित्तायोज्यम्। तीक्ष्णत्वं चेति। नात्र
हेतवः क्रमन्ते। शङ्खकरोहिण्यौ त्रिरात्रानतः सन्यासोनु-
पक्रमात्। सर्वो हन्तीत्येवमादि। स्वाभाविकं शास्त्रादनुस-
र्त्तव्यं ज्वरक्षीण ... न्यर्थातुस्थं यथा त्वङ्मांसाश्र-
यमुत्तानं गम्भीरं त्वन्तराश्रयमथवा गंभीर इव यस्य नश-
क्यते निश्चय आघातुं, वातादीनामन्यतमस्य। तथान्ये
व्याख्यानयन्त्यन्तर्वेगस्तन्त्रान्तर प्रामाण्याद्यथाग --
... -दैवेन च हतप्रभेन्द्रियं क्षाममरोगनिपी-
डितं गम्भीरं तीक्ष्णवेगात् ज्वरितं परिवर्जयेत् इति।
दैर्घ्यरात्रिको दीर्घकालानुबन्धः
विनते भ्रुवौ, लुनन्ति चाक्षिपक्ष्माणि सोऽचिराद्याति मृत्यवः।
इति दोषकालबलाबलात्। पञ्चज्वरसन्ततादय उक्तास्तेषां
यन्नाह- स्रोतोभिर्विसृता इत्यादिकैः।
स्रोतोभिरसवाहिभिः हृदयप्रतिबन्धाभिर्धमनीभिरित्यर्थः।
विषमं सृता विविधं विपरीतं वा सृता गुरवो विवृत्ते इत्यर्थः।

यदि सर्वं देहमनुयान्ति सामास्तदा सन्ततज्वरं अ-
न्यज्वरं सततादिकं व्याध्यन्तरं वा जनयन्ति। स्तब्धा इ-
त्यन्ये पठन्ति। स्तब्धाः अप्रचलितधर्माणः गुरवः सा-
मास्ते व्याख्यानयन्ति। तत्र दोषबलात्सन्ततो भवति।
तस्मात्पूर्वोदित एवार्थः। पाठश्च दृष्टा

सप्ताहं वा सुदुःसहः।

सशीघ्रं शीघ्रकारित्वात् प्रशमं याति हन्ति वा।

इति। कश्चोक्त एव चात्र भेदः प्रशमं याति हन्ति वा। सपुन-
श्च प्रलापादिविशिष्टो मारयत्येव। नन्वविशिष्टविशिष्टसा-
मग्र्युत्था यतु वा। किमिदं वैचित्र्यं। उच्यते। धातुम-
लपाकात् कथं वचनद्वयमन्तरा प्रतिपत्तुमशक्यं। तन्त्रान्तरप्र-
मास्यात्। पित्तानिलकफवृद्ध्या दशदिवसद्वादशाहसप्ताहा-
द्धन्ति। विमुञ्चेद्वाऽशु ज्वरोष्म। तथान्ये प्राहुः-

दशद्वादशसप्ताहैः पित्तश्लेष्मानिलाधिकः।

दह्यधोष्मणा धारमलान् हन्ति मुञ्चति वा ज्वरः। इति॥
अन्ये तु व्यवस्थिताद्वा न्द्विकं सान्निपातिकानामन्यस्य त-

क्षणस्याभावात् सर्वे · शेषेण त्रिविधं बलं मध्य-
हीनाधिकं प्रागुक्तन्यायाद्दशद्वादशसप्ताहैर्हन्ति वा मु-
ञ्चति वा क्लिश्यतां स्वेन कर्मणेत्याह- क्रमभेदः कस्मा-
द्दशद्वादशसप्ताहादित्युच्यते क्रमं भिन्दन्नेतज्ज्ञापयति-
कदाचिदपि · नवाहादावर्वागपि हीना द्वाद-
शाहात्परेणापि स्वभावश्चैकदोषाणां षड्भिः षड्भिरात्रि
पाकवत्, न केवलं तन्त्रान्तरप्रामाण्यादस्माच्च सन्ततसूत्र-
व्याख्यान् प्रतिपादयिष्यत्याचार्यः - षां
चानिलादय इत्यादि, वक्ष्यमाणन्यायाद्धातुमलपाकाव-
गतिरिति तस्मात्सूक्तम्, आह- पञ्चविधज्वरानुपपत्तिः
दोषदूष्यतुल्यत्वात् दोषा हि वातादयो विशिष्टा दूष्यश्च
रसः, आचार्यकं हि - - पादाय यावदाद्यमाहारप-
रिणामधातुं रसनामानं वेष्टा सप्रस्वेदवहानि स्रोतांसि
विधायैवं पित्ते श्लेष्मणि च संसार्या, साधिष्ठानत्वं च रस-
प्रदोषजेषु ज्वा - श्चेत्यारभ्य यावत् ज्वरस्तन्द्रेति, स्रोतो-
भिर्विविधा दोषा इत्यादि, सन्ततज्वरं कुर्वत इति, विशेषकारण-

णवचनमयुक्तं सन्ततस्य तस्मादेक एव ज्वरो दोषा-
दिबलाबलादिति चेत् तारतम्यमतोऽतिप्रसङ्गदोषा-
न्न मुच्यामहे इत्येतदाशंक्याह- कालदूष्यप्रकृतिभिः दोष
स्तुल्यो हि सन्ततं निष्प्रत्यनीकः कुरुते तस्मात् ज्ञेयः स
दुस्सहः, इति एतदुक्तं भवति- दूष्यं मेदः कालो व-
सन्तः श्लैष्मिकी प्रकृतिः यदाऽसमधिष्ठानं प्राप्नोति तदा
सन्ततमभिनिर्वर्त्तयन्ति शरदि दोषः, पित्तं दूष्यम् रक्तं पै-
त्तिकी प्रकृतिरसमधिष्ठानमेवं वर्षा वाति-
की निरधिष्ठानं रस एवं नीकलमनी-
कनाम बलसमूहस्तस्य प्रतिपक्षभूतं विरोध्यनीकं प्रत्य-
नीकं तन्निर्गतं यस्य दोषस्य स निष्प्रत्यनीको निष्प्रतिद्व-
न्द्वो ब्यादीनाम-
न्यतमत् प्रत्यनीकं दोषस्य विद्यत इति पञ्चविधोपपत्ति-
र्यद्येवं शरदिवातेन सन्ततज्वरेण स जेषु निष्प्रत्य-
नीकत्वं कृतेवसन्ते च मेदसि दूष्ये श्लेष्मप्रकृतेऽन्तर्जन्यज्व-
राभावः पित्तश्लेष्मणोरेवं विकल्पस्तथा द्वन्द्वसन्निपाताभ्यां

कालादियुक्त्यनुपपत्तेः पूर्वोदितेषु वातपित्तश्लेष्मज्व-
सहजेषु निष्प्रत्यनीकत्वं सम्भवति । द्वन्द्वसन्निपात-
योः कालतुल्यमेवं दूष्यप्रकृति अविपि विकल्पनीयैस्त-
स्मात् सन्ततज्वराभावः । द्विदोषजत्रिदोषजयोः कालो वि-
द्यत इति चेद् - थं शरदि पित्तश्लेष्मप्रकोपस्तस्य चा-
नुबन्धः कफ इत्याम्नानात्तथा त्रयाणां प्रकोपो वर्षावसन्त-
योः वर्षासु कुप्यन्ति पवनादयः । आदानमध्ये तस्यापि वा-
तपित्त - तस्मादतत्त्वाभिनिवेशोऽयमिति तन्नानुब-
न्धलक्षणाभावात्तान्त्रिकं हि अनुबन्ध्यलक्षणसमन्विता-
स्तत्र यदि दोषा भवन्ति । तत्रिकं सन्निपातमाचक्ष्महे द्वयं
वा - षां वर्षाशरद्वसन्तात्तुल्या भवन्ति । तस्मादेकत्रिदोष-
जसन्तताभाव इत्यत्रोच्यते । गुर्वभिधानान्निष्प्रतिद्वन्द्वोक्तेः
परमेश्वरवत् स्रोतोभिर्विसृता दोषा गुरवो ब - तास्तेच
दोषाः कालमतुल्यमपि तुल्यं कुर्वन्ति । यथा राजातिबली-
यस्तान् कश्चिदन्तर्विरूपं वशीकृत्यानिच्छन्तमपि स्वकार्ये व-
स्थापयति । एवं दूष्यप्रकृती अप्यन्यथा वैकृतज्वर

दूष्यप्रकृतिभिर्दोषस्तुल्यो हि सन्ततमित्युक्ते र्लब्ध्वा प्रतिद्वन्द्विता, यदयमाचार्यो निष्प्रत्यनीक इति करोति, तज्ज्ञापयत्येते प्रक- वो समाना अपि तान् बलवन्तो दोषा एकशो द्विशःसम - स दुःखसहो भवति, तित्ति- रिवद्यथा गुरुष्णमधुरो नातिधन्वानूपनिषेवणा तित्तिरिः स जयेच्छीघ्रं त्रिदोषाननितोल्बणान्, स एव धन्वानूपनि- षेवी, 'नान्य एवं नान्यो ज्वरः सन्ततो दुःसह इति, तन्त्रान्त- रं हि क कारणं"

एकदोषो द्विदोषो वा स्वल्पोपद्रवलक्षणः।

अतुल्यदूष्यप्रकृति कालदेशीनिलादिजः॥

सुसाध्य एव मन्तव्यः सन्ततोऽन्योऽपि वा गदः।

अतोऽन्यथा तु दुःसाध्यो वान्योऽपि वा -

सन्तत उक्तः, इदानीं कालादिबलाबलात् सततकादय उच्यन्ते-

रक्तधात्वाश्रयः प्रायो दोषः सततकमित्यादि, रक्तमेव धातु रक्तधातुः तदाश्रयो दोषः सततकं करोति, नन्वन्य - रक्त- स्य इत्युच्यते, रसाधिष्ठानत्वात् सर्वज्वराणां प्राधान्याद-

च रक्तधातुः प्रायोग्रहणान्मांसमप्यधिष्ठाय प्रवर्तते।
यद्येवमन्येऽपि मेद आदयः कस्मान्नाश्रया भवन्त्यु-
च्यते- अन्ये दुष्क - . . हन्च दोषो मेदोप-
हारध्वानाकीरन्येध्रुकमित्यादि। सप्रत्यनीकः कुरुते। स
प्रतिद्वन्द्व इत्यर्थः। 'कालवृद्धिक्षयात्मक इति। काले वृद्धि-
क्षयौ कालवृद्धिक्षयौ तावात्मा यस्य स तथा - . -
. न्द्रियः कालो विपर्ययेण च काल . . प्रयोज-
नीयः। अहोरात्रे कालद्वयमनुवर्तते। एकद्वन्द्वसन्निपाताद-
ध्यस्तेषां कालादीनां प्राप्य बलं लब्ध्वेत्यर्थः। दोषो मेदो-
पहारुध्वानाकीरन्येध्रुक
कालेऽनेककालं चेमौ वर्तते। व्याधिस्वाभाव्याद्विचित्रा हि
व्याधीनां स्वभावाः। शंखकादिवदित्युक्तम्। विषवेगवद्वा
यथा . . . 'काले ज्वरयति स्रो-
तोवशाद्वै विषमज्वरप्रस्तावे वक्ष्यामः। ननु च रक्तधात्वा-
श्रयः सततकं करोतीत्युक्तमन्ये। एके तु मेदोव - -
- . . कथं मेदस उच्यते। अन्योन्यानुविधानात् स्रो-

तांसि स्वधातुव्यवस्थितानीत्यभिप्रायः। इत्यनन्तरं स्रोतोभि-
र्विसृता इत्यस्य भाष्यम्-

यथा धातूंस्तथा मूत्रं पुरीषं चाऽनिलादयः। इत्यादि।
सर्वदेहानुगा इत्युक्तं देह - मनो देहश्च सेन्द्रि-
यः न च पुरीषादयः क्वचित् आश्रयत्वेनोक्ताः। पक्वाशयाद्या-
श्रया व्याधय उक्ता इति चेत्तन्न। देहैकदेशः सोऽभिप्रेतो
देहमनसी केशलोमनखाग्रान्न मलद्रवगुणैर्वि-
- धान्येन रसाधिष्ठानः सन्ततस्तथापि सर्वाश्रयो
यथा धातूंस्तथा मूत्रं पुरीषं चानिलादय एककालमेवा-
नुपपद्यन्ते अनुगच्छन्ति। आश्रयश्चात एव- द्वादशैते
समुद्दिष्टाः सन्ततस्येति क - - कालेषु प्रशमं याति
हन्ति वेत्याह-स शुद्ध्या व्याप्यशुद्ध्या रसादीनामशेषतः।
शुद्ध्यामलपाकलक्षणया शमं याति धातुपाकलक्षण-
या अशुद्ध्या मारयति। यदा शुद्ध्यशुद्धी नातिरक्त -
- दशेऽहनि दीर्घकालमपि अनुबध्यते। एवं बुद्ध्वा प्रा-
गेवोपाचरेद्युक्तः अवहित इत्यर्थः। अग्निवेशतन्त्रं चर-

काचार्येण संस्कृतस्तथाहि- तद्वचो धातुमूत्रशकृद्वाहि-
स्रोतसां व्य-   ]तनुं सर्वां तुल्यदूष्यादिवर्धिताः।
बलिनो गुरवः स्तब्धा विशेषेण रसाश्रिताः। सन्ततं नि-
ष्प्रतिद्वन्द्वज्वरं कुर्युस्सुदुःसहं।

मलाज्वरोष्मा धातून्वा सशीघ्रं क्षपयेत्ततः।

सर्वाकारं रसादीनां शुद्ध्याशुद्ध्या -   ।

धदश द्वादशवासरात् प्रायोऽनुयाति मर्यादां
विमोक्षाय वधाय चेति. तथाऽन्ये प्राहुः-

दोषान् धातून् मलान् प्राहुराश्रयान् सन्तते ज्वरेण.
तथापि चाश्रयसंशुद्धावशुद्धावपि सन्ततः सप्ताहादिषु
शुद्धस्शुद्धौ ज्वरः कालदीर्घमप्यनुवर्तत इति.

तस्मादार्षो ग्रन्थ इति तृतीयकचतुर्थकयोरवसरस्त-
योराश्रयः, तस्मादाचार्येण नोक्तम्. पारिशेष्यादस्थि
मज्जा नावशिष्यते. ज्वरद्वयं च तृतीयकचतुर्थकम् -
कृतास्पदत्वान्नृतीयकम   चतुर्थकं च मज्जनिऽयवास्थि-
नो दोषः करोति. कालश्च नाम्नैव लब्धः. कालप्रयोजनाद्वो-

ग इत्यत्र व्युत्पादितात्तृतीये बहिर्भव इति। तथा च जातू-
कर्णवचः सन्तत ... चतुर्थको ज्वराः पञ्चरसनाडीस्थे
दोषे सन्ततो निष्प्रतिद्वन्द्वः सप्तदशद्वादशाभिः दिनैर्हन्ति।
विमुञ्चति वा नक्तं दिने द्विः सन्ततको ऽसृङ्मांसदूष्या-
त् भवति। सकृदन्येद्युर्मेदस्थः प्रतिद्वन्द्व - - -
स्थानि तृतीयकः स्यात् चतुर्थको मज्जनीति। अपरं
च क्षारपाणीयं वचः अस्थीनि संश्रित्य तृतीयकस्तु मे-
दः समाश्रित्य च केचिदन्ये मज्जानमाश्रित्य च चतुर्थक-
स्तु प्रवर्त्तते तेन स दुश्चिकित्स्यः। कस्मादथैक - -
स्रोतोवशादित्युक्तम्। स्रोतांसि मूलस्थानान्युत्त-
रोत्तरं तन्वानि सूक्ष्मसूक्ष्मतरमुखानि पात इव का-
लद्वयं सन्ततकस्ततोऽन्येद्युष्कस्तृतीयो हि तृतीयक-
स्तस्मादपि विप्रकृष्ट ... दीप्यण्या-
कत्या प्रतानसदृशानि च वीरुधामिव मूलेषु स्थूलान्यग्रे
तनूनि। पटरवाहे च पठ्यते-
सूक्ष्मसूक्ष्मतरास्येषु दूरदूरतरेषु च। रक्तादि

यत्तेन विच्छिन्नः सन्तापो कथ्यते-

ज्वरे दोषो ज्वरयति कुद्धश्चिराच्चिरतरेण तदङ्कुरवत्त्वा।

इति' शास्त्रकार आह-यथा-

अधिशेते यथा -

दोषि कालेन्च कुप्यति ॥

एतदुक्तं भवति - कारणसान्निध्येऽपि सति कस्मान्न सर्वदा जनयति यावदतिशयं कालं न प्राप्नोत्यमुमेवार्थं प्रकट-यन्नाह- सवृद्धिं स्वहेतुभ्यः प्राप्य बलकालंच

कुरुते प्रत्यनीकंच बलक्षयात् प्रत्यनी-केन बलक्षयादित्यर्थः ।

कृत्वा वेगं गतबला स्वे स्वे स्थाने व्यवस्थिताः।

पुनर्विवृद्धा स्वे काले ज्वरयन्ति नरं मलाः॥

मलिनीकरणाद्दोषा मला इत्युच्यते ।

सामर्थ्यं यथाविषस्य वेगकरणसामर्थ्यं कालबलादित्यत्र तन्त्रान्तरवच :- भूमौ स्थितं जलैः सिक्तं कालमेव प्रतीक्षते।

बीजं यथाङ्कुरोत्पत्तौ दोषस्तद्वज्ज्वरोदये ।

य - यत्क्षीयतो बलं प्रकुप्यत्यबलं भूयः काले दो-
षविषं तथा। इतीत्थं चैतदवगम्यताम्। एवमसौ परां का-
ष्ठामापन्नः प्रत्यनीकबलक्षया दात्मीयकालबलाच्च पूर्वा-
ह्णादौ यस्त्वेन रसाश्रितः तुल्यदूष्यादित्वेन निष्प्र-
तिबन्धः सन्ततं रक्तमांसयोरन्यतरयाश्रितः सप्रतिपक्षः
सततं करोति। मेद आश्रितस्तद्वदन्येद्युष्कमस्थ्याश्रि-
तस्तथैव तृतीयकमज्जा रोत्येवं चैते वातादयो वृ-
द्धा येन परस्थाने तृतीयकचतुर्थकौ कुर्वन्ति प्रत्यनीक-
बला दाक्षिप्तशक्तयोऽन्यथा सततमेव प्रवर्त्तयेरन्। त
पित्तात्त्रिकग्राही पृष्ठाद्वात रौ ग्राहीति वास्तिः
पुरीषाधानं कटी स कल्येवमादि वातस्थानमेव त्रि-
कं तत्र कफश्चिपित्तं व्यवस्थितमपरस्थाने दुर्बलं येन
तृतीयकं नान्यं सन्ततादिकमप्रत्यनीकबल स्था-
ने तृतीयकं करोत्येवं पृष्ठे शिरसीव योज्यम्। अप्रकृति-
स्थानां दोषाणां स्थाननियमः प्रकुपितानामनियमः स-
र्वशरीरचरास्तु वातपित्तश्लेष्माण इत्याम्नानादेवं शिर-

श्लेष्मणः परस्थाने श्लेष्माण्यवस्थितोवातश्चतुर्थकं तनोतीति पूर्ववद्योज्यम् । अत आह चतुर्थको दर्शयति - प्रभावं द्विविधं ज्वरम् । या

शिरस्थोनिलसम्भवः इति । पैत्तिकचतुर्थमाद्युक्तानुपपत्तिर्न सम्भवति । तेन नोच्यते यथा - एक ऊरुस्तम्भ - स्त्रिदोषजो नैकद्विदोषजो नानात्वजश्च यथा - ननु हा -

चतुर्थको दर्शितः स किमिति नातितुल्यं च प्रामाण्यं सर्वेषामग्निवेशादीनामग्निवेशश्च भेलश्च

जातूकर्णः पराशरः ।

हारीतः क्षारपाणिश्च जगृहुस्तन्मुनेर्वचः । इत्युक्तेः ।

तथा - दारुणो विषमज्वरः ।

शोषणः सर्वधातूनां बलवर्णाग्निनाशनः ।

त्रिदोषजो विकारः स्यादस्थिमज्जागतोऽनिलः ।

कुपितं पित्तमेवं तु कफश्चैव स्वकालतः ।

शीतदाहकरस्त्री -

यः पूर्वं सोऽनिलात्मकम् ।

पूर्वं ग्रहात्यधःकायं श्लेष्मावृद्धश्चतुर्थकः।
कस्माच्चतुर्थकस्यापि प्रकोपस्त्रिविधः स्मृतः। इति॥

हारीतस्यापि तदनु-

बक्तत्वेन तल्लिङ्गदर्शनादनेनाऽभिप्रायेणाह- तन्त्रकार-

चतुर्थको दर्शयति- प्रभावं द्विविधं ज्वरम्।

विषमज्वर एवान्यश्चतुर्थ यकचतुर्थयोरभिप्रेतं

चतुर्थक आद्यन्ते अहनी ज्वरयति। द्वे अहनी मध्ये मुञ्च-
त्ययं पुनर्मध्ये ज्वरयत्याद्यन्तयोरपैत्येषा विपर्ययः। सर्वे-
षां सन्ततादीनामधिष्ठानमुक्तमस्याऽश्रयकथनायाह-
धातुस्थं करोति। यं धातुशब्द आद्यो दो-
षेषु वर्तते। दोषा अपि धातुशब्दं लभन्त इत्याम्नानात्
वातादीनामन्यतम एकैको धातुद्वयस्थोऽस्थिमज्जस्थ इति।
कृतो येन मध्येऽहनि धौरसादीनामन्यतमौ।
तन्त्रान्तरमप्येतदर्थं ज्ञापयति-

अस्थिमज्जोभयगते चतुर्थकविपर्ययः।
मध्ये द्व्यहं ज्वरयति आद्यन्ते तु विमुञ्चति।

विषमज्वर एवायं प्राग्वद्धेतुबल

शिवसैन्धवा आषाढवर्मप्रभृतयोऽस्य व्याख्यानयन्ति।

वातादीनामन्यतमो द्वयोर्दोषयोर्वातपित्तयोः श्लेष्मपित्तकफयोर्वायुर्वातश्लेष्मणोः पित्तं व्यवस्थित। सौश्रुतं दर्शयन्ति-

कफस्थानेषु वा दोषस्तिष्ठन्द्वित्रिचतुर्ज्वा।

विपर्ययाख्यां कुरुते विषमां कृच्छ्रसाधनाम्॥

परो हेतुस्वभावो वा विषमे कैश्चिदीरितम्।

उदाहरणं चेदमेव। व्या। रात्रिज्वरादयं व्याख्यायमाने न्यूनतादोषो न भवति। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्। इति वचनाद्व्याख्याद्वयबलाबलं वृद्धा विवेचयिष्यन्ति। ननु च सन्ततादयः पञ्चज्वर-पति सूत्रितम्। साध्ये वधिको ऽपरो व्याख्यातः। वक्तव्यात्रोपपत्तिः। उच्यते अत्रैवावरुद्धत्वात् कदाप्युदरमदादिवत्। अन्यथा नचोदराणि मदाश्च षट् स्युरिति नोत्सूत्रम्। ननु च यदि पञ्चविधो ज्वरः सान्नि-व्यपदेशः कथमित्यत आह-

प्रायशः सन्निपातेन दृष्टः पञ्चविधो ज्वरः।

सन्निपातेतु यो भूयात् स दोषः परिकीर्त्तितः॥

अथवा प्रायोग्रहणा देकदोष द्विदोषजा अपि भवन्ति। अन्ये त्वन्यथा व्याख्यानयन्ति। वि ... ... वसन्ततादयः सन्निपातजास्तेषामयं भूयस्त्वेन व्यपदेशो ये पुनर्निदानेरिताः प्रकृतिसमसमवायारब्धा स्त एकद्विदोषजा अपि भवन्तीति साधुः। ननु शुक्रमपि प्रधानधातुः। तत्स्थेदोषे अनियतकालत्वादत्यन्तसूक्ष्माणि तद्वहानि स्रोतांसि यावता कालेन यान्ति दोषास्तावतांगमर्द्दप्रायं नैव वा ज्वरस्यत्पत्वात् कदाचित्पञ्चाहादिभिः कदाचिद्दशाहादिभिरिति। ननु हारीततन्त्रस्थे—

तस्मान्मरणमाप्नोति शुक्रस्थानंच गच्छति।

शेफः स्तब्धमित्यादि। तस्माद्व्याख्याना विरुध्यन्ति। टीकाकृताः अनियतकालत्वान्नोक्त इत्येतदेववरम्। अन्येत्वभावमेव पठन्ति। अतिल ... ... पञ्चम असाध्यलक्षणानि व्यावर्णितान्येव। शुक्रस्थज्वरलक्षणमपार्थमिति। शुक्रादिविसृ—

ष्टि कथमरिष्टे पतिष्यन्तीति साधु । ननु च दृश्यते ।
ज्वराणां व्यतिरेकः करः सन्ततोपि स्वरूपमुज्झित्वा सतता-
दीनामन्यत   त्यस्य कथनायाा-
ह- अत्वहोरात्रदोषाणामित्यादि । अस्य कोऽर्थः । इमे ब्रूमः ।
अत्वहोरात्रदोषाणामिति द्वन्द्वे पुनः अत्वहोरात्रदोषाणामि-
ति द्वन्द्वो   च्यते । ज्वरोऽर्थव-
शाच्चेति । एतदुक्तं भवति -
हेतुत्रयस्यास्य बलाबलाभ्यां व्यतिकरः मनसो विच्छि-
द्याध्ययनं शारीरमानसयोर्युत   .
रोपि मानसमनुविध्यत्ते । मानसोऽपि शारीरं । पृथगध्ययनमर्थ-
स्य शरीरमनसोश्चार्थवशत्वरव्यापकमर्थशब्देनात्र प्राक्तन-
कर्माभिधानम् । पुनः शब्दादिप्रयोजनाभिधानं कुतः श-
ब्दादीन्मिथ्याहीना   णां बलाबले नस्तः । अर्थे
च कर्मलक्षणे । प्रयोजनस्याभिशापदेवताराधनादेरनुप्रवेशः
अन्ये मनःशब्देन बुद्धिं व्याख्यानयन्ति । कारणे कार्योपचा-
रात्तस्याश्च किं बलाबलमुच्यते ।   ज्वरीप्रज्ञा-

पराध्याद्देवादीनवमत्याहि तान्याचरन्ति तदा तृतीयक-
पूर्वेषामन्यतममाप्नोति यदा शुद्धसत्त्वोत्कर्षाद्विवेकि-
न्या बुद्ध्योपेतो भवति शुभानि देवताराधनेष्विव-
ति तदा सन्ततज्वरी सततादीनामन्यतममुत्तरं प्राप्नोति।
यद्येवं प्रयोजनाभिधायिनोऽर्थेन व्याख्यानेन नितरां
नार्थ इति अथेदानीं व्याख्यायते। ऋतुबलाबलादहो
रात्र बलाबलाद्यदा निदाघसमयो वातप्रधानश्चातुर्थ-
को वर्षासमयं प्राप्नोति तदा तेनर्तुनाप्यायितबल-
स्तृतीयकपूर्वेषामन्यतमं प्राप्नोत्युत्कर्षादेवं वर्षास-
मये प्नोति तदा तयाऽपकृष्टबलः सन्ततादीनाम-
न्यतमत्वेन परिणमत्येषोऽपकर्षः एवं पित्तश्लेष्मणोर-
प्युत्कर्षापकर्षावार्त्तवौ योजयितव्यौ। अहोरात्रशब्देन
कतिपयदिनरात्राणि परि- न्नकस्मिन्नहोरात्रे सन्त-
तादीनामुत्कर्षापकर्षाभ्यां चतुर्थकपूर्वेषांञ्च भावाभा-
वतोऽनुपपत्तिरहोरात्रप्रक्रिया व्याख्यायते। मासद्वयमृ-
तुरविच्छेदेन गृह्यते नैवं दिनरात्राणि यदा वि-

कमारभन्ते अबलत्वात्तदा मध्यानि कतिपयानि दिनान्यवाप्य स एव तृतीयकपूर्वकत्वेन परिणमत्यु- त्कर्षात्, अपकर्षात्तु यदान्यन्यानि दिनान्याप्नोति तदा सन्तत - तस्य वातश्लेष्मारब्धः प्रतनुकत्वात्स- न्ततादीनामन्यतमत्वेन परिणमते, अथैवमाशंक्यते- अहोरात्रत्तोरन्यत्वात् भेदाभावः, तदस्मिन् व्याख्याने- नावतरति, अप्रयोजकत्वादेकस्या . . . . च्येत, यथा संवत्सरभागेष्वृतुषु चयप्रकोपप्रशमः दोषाणां तथाहोरात्रावयवेष्वपि पूर्वाह्णादिषु स्वतन्त्रपरतन्त्र- योः ज्ञापितत्वात्-

पूर्वमध्यापराह्णाश्च रात्रियामास्त्रयश्च ये।

ये . . . ये रोगास्ते च कालजाः। इति।

तथा परतन्त्रेऽपि पूर्वाह्णे वसन्तलिङ्गं मध्याह्ने ग्रीष्म- स्यापराह्णे प्रावृषः प्रदोषे वार्षिकं शारदमर्धरात्रे प्रत्यूष- सि हैमनमुपलक्षयेत् वर्षमिव शीतोष्णवर्षदोषोप- चयप्रकोपशमैर्जानीयादित्युक्तः। एतत्तु युक्त्यान - ग-

ते विरोधादेककालजन्मनां चयप्रकोपप्रशमानामे -
कस्मिन्नेवाहोरात्र . . . . सोचितः कुपितः शान्तश्च ।
नह्यहोरात्रपद्धतिव्यतिरेकेण वा ऋतुर्विद्यते । ततश्च हे -
मन्ततौ श्लेष्मणश्चयाभावप्रसक्तिर्विरोधादेककाले
क्रियानिष्ठे कथं स्यातां । . . . ऋभागजः स -
एव सन्तः कुपितः शान्तश्च यदृतुजः सोऽनुवर्त्तत एव ।
एवं चाहोरात्रपद्धतिव्यतिरेकेणत्तोरन्यस्याऽसम्भवः ।
एवमृत्वोरुत्तरयोरपि वातपित्तचयाद्यभावं प्रत्युक्तम् ।
अन्तराळचय . . . . . . कालः प्रसक्तो
न शक्यन्ते पाकर्तुमाहोरात्रिकेणातपेन विरोधिनाभि -
मानीव न हि महद्भिमतपीयसा विरोधिनाप्यातपे -
न विलापयितुं शक्य . . . . -
. . विवक्षितः । पूर्वाह्णे श्लेष्मणो मध्या -
ह्नकालेनापि शान्तैव कालस्वाभाव्यान्महान् चयोऽनु -
वर्त्तत एव । अन्यथार्त्तवश्चयो न स्याद्दृश्यन्ते च सर्व -
स्य काष्ठ . . तस्मान्नैककाले क्रियानिष्ठे यद्येवं

तस्याहोरात्रे संवत्सरातिदेशस्य किं प्रयोजनमुच्यते।
गूढलिङ्गव्याधिप्रसिद्ध्यर्थं स्थेषु कालेषूत्पातादि-
जन्य व्याधय आप्य - धमातादिना क्रि-
याकालावधारणार्थं च यानि वसन्तादिषु वमनादीनि
कर्माणि कार्याणि तानि पूर्वाह्णादिषु कार्याण्युक्तं च -
पूर्वाह्णे - न्धितुविरो नकिञ्चिदावर्त
दिवसे द्वादस्थापनमभिषगतिकालं स्वाभाव्याद्य
दोषां बलकालावस्थाऽभ्युपगन्तव्या। अन्यथा -
भागात्पित्तस्य बलकालाभावः स्यान्नचैवं कुतो यस्मान्न -
ह्यनुमानेनागमा बाध्यन्ते। विशेषतो, दृष्टफलाः तस्माद् -
ज्वरे क्रियोगतिभेदादन्यथा परस्परविरुद्धं कार्यद्वयं
सर्वदा कथं स्यात्, प्रधानगुणभावादृते, त एव कोप -
शमौ गुणभूतौ सिध्यतः अनेन चापि - कतिप -
